"सव्येन च कटीदेशे गृह्य वाससि पाण्डवः।
तन्नचो द्विगुणं चक्रे रुवन्तं भैरवं रवम्" ॥)

कटीतलः, पुं, (कट्यां तलमास्पदमस्य । अस्य कटिदेशे धारणप्रसिद्धेस्तथात्वम् ।) न्युब्जखड्गः। इति त्रिकाण्डशेषः। बाँका खाँड़ा इति भाषा ॥

कटीरं, क्ली, (कट्यते आव्रियतेऽसौ वाससेतिशेषः। कट् + "कृशृपृकटिपटिशौटीभ्यः ईरन्"। उणां। ४। ३०॥ इति ईरन् ।) कटिः। इति हेमचन्द्रः ॥

कटीरः, पुं, (कट्यते आव्रियतेऽसौ अथवा कट्यते गम्यते अनेन । कर्म्मणि करणे वा ईरन् । उणां। ४। ३०।) जघनम्। कन्दरः। इत्युणादिकोषः ॥ कटिः। इति जटाधरः ॥

कटीरकः, पुं, (कटीर एव स्वार्थे संज्ञायां वा कन् ।) नितम्बः। इति त्रिकाण्डशेषः ॥

कटु, क्ली, (कटति सदाचारमावृणोतीति । कट् + उन् ।) अकार्य्यम्। इत्यमरः। ३। ३। ३५॥ दूषणम्। इति विश्वः ॥

कटुः, पुं, (कटति तीक्ष्णतया रसनां मुखं वा आवृणोति यद्वा कटति वर्षति चक्षुर्मुखनासादिभ्यो जलं स्रावयतीति। कट् + उन्। "कटिवटिभ्यां च"। उणां। १। ९।) रसविशेषः इत्यमरः। १। ५। ९। झाल इति भाषा॥ अस्य गुणाः कण्ठजदोषशोथमन्दाग्निश्वित्ररोगनाशित्वम्। अस्य बहुसेवने त्वयदाहत्वम्। वीर्य्यबलापहत्वञ्च। इति राजनिर्घण्टः ॥ अपि च। आरोग्यपित्ताग्निवायुकारित्वम्। कृमिकण्डुविषरोगस्तनदुग्धमेदःस्थौल्यनाशित्वम्। लघुत्वम्। अतिशयभक्षणे श्रमस्थैर्य्यतालुशोषातिदाहकारित्वञ्च। इति राजवल्लभः ॥ (तथा चोक्तम्। भावप्रकाशे।

"कटूरूक्षः स्तन्यमेदःश्लेष्मकण्डूविषापहः।
वातपित्तकृदाग्नेयः शोषी पाचनरोचकृत्" ॥

अस्य लक्षणं यथाह वाभटः ॥

"उद्वेजयति जिह्वाग्रं कुर्व्वंश्चिमिचिमां कटुः।
स्रावयत्यक्षिना स्यं कपोलौ दहतीव च" ॥

गुणकर्म्माणि च यथा, तत्रैव।

"कटुर्गलामयोदर्द्दकुष्ठालसकशोफजित्।
व्रणावसादनः स्नेहमेदःक्लेदोपशोषणः ॥
दीपनः पाचनो रुच्यः शोधणोऽन्नस्य कर्षणः।
छिनत्ति बन्धान् स्रोतांसि विवृणोति कफापहः ॥
कुरुते सोऽतियोगेन तृष्णां शुक्रबलक्षयम्।
मूर्च्छामाकुञ्चनं कम्पं कटीपृष्ठादिषु व्यथाम्" ॥ * ॥

कटुको रसो वक्त्रं शोधयति अग्निं दीपयति, भुक्तं शोधयति, घ्राणमास्रावयति, चक्षुर्विरेचयति, स्फुटीकरोतीन्द्रियाणि अलसकश्वयथूपचयोदर्द्धाभिष्यन्द-स्नेह-स्वेद-क्लेदमलानुपहन्ति, रोचयत्यशनं, कण्डूर्विनाशयति, व्रणानवसादयति, क्रिमीन् हिनस्ति, मांसं विलिखति, शोणितसङ्घातं भिनत्ति, बन्धांश्छिनत्ति, मार्गान् विवृणोति, श्लेष्माणं शमयति, लघुरुष्णो रूक्षश्च ॥ स एवंगुणोऽप्येक एवात्यर्थमुपयुज्यमानो विपाकप्रभावात् पौंस्त्वमुपहन्ति, रसवीर्य्यप्रभावान्मोहयति, ग्लापयति, सादयति, कर्षयति, मूर्च्छयति, नमयति, तमयति, भ्रमयति, कण्ठं परिदहति शरीरतापमुपजनयति, बलं क्षिणोति, तृष्णां जनयति, वाय्वग्निबाहुल्याद् भ्रम-मद-दवथु-कम्प-तोद-भेदैश्चरण-भुज-पार्श्व-पृष्ठप्रभृतिषु मारुतजान् विकारानुपजनयति ॥ इति चरकः ॥) चम्पकवृक्षः। इति शब्दचन्द्रिका॥ चीनकर्पूरः। पटोलः। कट्वीलता। इति राजनिर्घण्टः ॥

कटुः, स्त्री, (कट्यते कटुत्वेनास्वाद्यते इति। कट् + उ।) कटुकी। इत्यमरः ॥ प्रियङ्गुवृक्षः। राजिका। इति विश्वमेदिन्यौ ॥

कटुः, त्रि, (कटति परलक्ष्मीदर्शनेन कृपणतां गच्छतीति। कट् + उः।) मत्सरः। तीक्ष्णः। इत्यमरः। ३।३।३५॥ (यथा, महाभारते १। पौष्यपर्व्वणि ३। ५५। "क्षारतिक्तकटुरूक्षोष्णतीक्ष्णविपाकैश्चक्षुष्युपहतोऽन्धो बभूव"।) कटुरसयुक्तः। (यथा, भागवते। ३। २६। ४२।

"कषायो मधुरस्तिक्तः कट्वम्ल इति नैकधा।
भौतिकानां विकारेण रस एको विभिद्यते" ॥)

सुगन्धिः। इति मेदिनी ॥ (यथा, रघुः। ५। ४८।

"सप्तच्छदक्षीरकटुप्रवाह-
मसह्यमाघ्राय मदं तदीयम्" ॥)

अप्रियः। इति त्रिकाण्डशेषः॥ (यथा, रघुः ६। ८५

"इति समगुणयोगप्रीतयस्तत्र पौराः
श्रवणकटु नृपाणामेकवाक्यं विवव्रुः" ॥)

दुर्गन्धः। इत्यमरटीकायां स्वामी ॥

कटुकं, क्ली, (कटुकानां कटुरसानां त्रयं कटोः संज्ञायां कन्।) त्रिकटु। इति मेदिनी ॥ तत्तु शुण्ठी पिप्पली मरिचञ्च॥ (कटु एव। स्वार्थे कन्। इति विग्रहे वाच्यलिङ्गं। अप्रियम्। यथा, महाभारते। २। अनुद्यूतपर्व्वणि ७७। १६।

"दुर्य्योधनश्च कर्णश्च कटुकान्यभ्यभाषताम्।
इति सर्व्वमिदं राजन्नाकुलं प्रतिभाति मे" ॥)

कटुकः, पुं, (कटुरेव कटुकः स्वार्थे कन् ।) कटुरसः। (यथा, सुश्रुते "यो जिह्वाग्रं बाधते उद्वेगं जनयति शिरो गृह्णीते नासिकाञ्च स्रावयति स कटुको रसः" ॥) पटोलः। इति राजनिर्घण्टः॥ सुगन्धितृणम्। इति शब्दरत्नावली ॥ कुटजवृक्षः। अर्कवृक्षः। इति शब्दचन्द्रिका॥ राजसर्षपः। इति हारावली॥

कटुकन्दः, पुं, (कटुः कन्दोमूलमस्य।) शिग्रुवृक्षः। आर्द्रकम्। लशुनम्। इति मेदिनी ॥

कटुकफलं, क्ली, (कटुकं फलमस्य।) कक्कोलकम्। इति राजनिर्घण्टः ॥

कटुका, स्त्री, (कटु + संज्ञायां कन्। स्त्रियां टाप्।) क्षुद्रचञ्चुवृक्षः। वृक्षविशेषः। कट्की इति भाषा। तत्पर्य्यायः। जननी २ तिक्ता ३ रोहिणी ४ तिक्तरोहिणी ५ चक्राङ्गी ६ मत्स्यपित्ता ७ वकुला ८। शकुलादनी९ सादनी १० शतपर्व्वा ११ द्विजाङ्गी १२ मलभेदिनी १३ अशोकरोहिणी १४ कृष्णा १५ कृष्णभेदी १६ महौषधी १७ कट्वी १८ अञ्जनी १९ काण्डरुहा २० कटुः २१ कटुरोहिणी २२ केदारकटुका २३ अरिष्टा २४ मत्स्यी २५। इति राजनिर्घण्टः ॥ कटम्बरा २६ कटुम्भरा २७ अशोका २८। इत्यमरः तट्टीका च ॥ (अस्य गुणाः।

"कटुका कटुका पाके तिक्ता रूक्षा हिमा लघुः।
भेदिनी दीपनी हृद्या कफपित्तज्वरापहा।
प्रमेहश्वासकासास्रदाहकुष्ठकृमिप्रणुत्" ॥

इति शब्दार्थचिन्तामणिधृतवैद्यकवचनम् ॥) अतिकटुत्वम्। तिक्तत्वम्। शीतत्वम्। पित्तरक्तदाहबलाशारोचकश्वासज्वरनाशित्वम्। रुचिकारित्वञ्च। इति राजनिर्घण्टः। सारकत्वम्। रूक्षत्वम्। कफनाशित्वञ्च। इति राजवल्लभः॥ताम्बूली। इति शब्दचन्द्रिका ॥ कुलिकवृक्षः। इति रत्नमाला ॥

कटुकालाबुः पुं, (कटुका अलाबुः।) कटुतुम्बी। इति रत्नमाला ॥ तित्लाउ इति भाषा ॥

कटुकी, स्त्री, (कटु + स्वार्थे कन्। गौरादित्वात् ङीष्।) कटुका। इति मेदिनीशब्दरत्नावल्यौ। कट्की इति भाषा ॥ (अस्या गुणाः।

"कटुकी तु सरा रूक्षा कफपित्तज्वरापहा"।

इति वैद्यकद्रव्यगुणग्रन्थे ॥

"कट्वी तु कटुका पाके तिक्ता रूक्षा हिमा लघुः।
भेदिनी दीपनी हृद्या कफपित्तज्वरापहा।
प्रमेहश्वासकासास्रदाहकुष्ठक्रिमिप्रणुत्" ॥

इति भावप्रकाशः ॥)

कटुकीटकः, पुं, (कटुः तीक्ष्णः दंशनेन दुःखप्रदत्वात् कीटः। ततः स्वार्थे कन्।) मशकः। इति जटाधरः॥

कटुक्वाणः, पुं, (कटुः कर्कशः क्वाणः क्वणनं शब्दो यस्य।) टिट्टिभपक्षी। इति हेमचन्द्रः ॥

कटुग्रन्थि, क्ली, (कटुस्तीव्रो ग्रन्थिर्मूलमस्य।) पिप्पलीमूलम्। शुण्ठी। इति राजनिर्घण्टः ॥

कटुचातुर्जातकं, क्ली, (चतुर्भ्यो जातकं ततः स्वार्थे अण् ततः कर्म्मधारयः।) एलात्वक्पत्रकमरिचात्मकचतुष्कम्। इति राजनिर्घण्टः ॥

कटुच्छदः, पुं, (कटुश्छदः पत्रं यस्य।) तगरवृक्षः। इति शब्दरत्नावली ॥

कटुतिक्तकः, पुं, (कटुश्चासौ तिक्तश्चेति। स्वार्थे कन्।) शणवृक्षः। इति राजनिर्घण्टः॥ भूनिम्बः। इति वैद्यकम् ॥

कटुतिक्तका, स्त्री, (विपाके कटुः स्वादे तिक्ता। स्वार्थे कन्। अत इत्वम् ॥) कटुतुम्बी। इति शब्दरत्नावली ॥

कटुतुण्डी, स्त्री, (कटु तीव्रं तुण्डमस्याः।) लताप्रभेदः। कटुतराइ इतिख्याता। तत्पर्य्यायः। तिक्ततुण्डी २ तिक्ताख्या ३ कटुका ४ कटुतुण्डिका ५ विषा ६ ॥ अस्या गुणाः। कटुत्वम्। तिक्तत्वम्। कफवान्तिविषारोचकरक्तपित्तनाशित्वम्। सदा पथ्यत्वम्। रेचनत्वञ्च। इति राजनिर्घण्टः ॥

कटुतुम्बी, स्त्री, (कटुश्चासौ तुम्बी चेति।) लताविशेषः। तित्लाउ इति भाषा। तत्पर्य्यायः। इक्ष्वाकुः २। इत्यमरः। २। ४। १५६ ॥ कटुकालाबुः ३ नृपात्मजा ४। इति रत्नमाला॥ कटुतिक्तिका ५। इति शब्दरत्नावली॥ कटुफला ६